☎ : 011-28524993/5 फैक्स् : 011-28524387 (NFSE) www.sanskrit.nic.in nfsersks@gmail.com

# राष्ट्रिय-संस्कृत-संस्थानम् ( मानितविश्वविद्यालयः )

## ( भारतशासनस्य मानव-संसाधन-विकास-मन्त्रालयाधीनम् )

56-57, इन्स्टीट्यूशनल् एरिया, डी-ब्लाक्, जनकपुरी, नवदेहली - 110 058

# संस्कृतशिक्षकप्रशिक्षणवर्गार्थिनां चयनम्

नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानेन संस्कृतमाध्यमेन संस्कृतशिक्षणकौशलं भाषादक्षताञ्च वर्धयितुम् एकविंशतिदिनात्मकः आवासीयः संस्कृतशिक्षकप्रशिक्षणवर्गः मई-जूनमासयोः आयोजयिष्यते। तस्मिन् वर्गे भागं ग्रहीतुमुत्सुकानां **प्रशिक्षणार्थिनां चयनार्थम्** अधोनिर्दिष्टस्थानेषु साक्षात्कारः (Walk-in-interview) भविष्यति।

**साक्षात्कारदिनम्** – 11 अप्रैल् 2010 (रविवासरः)

**समयः** – 10:00 तः 11:00 वादनं यावत्। साक्षात्काराङ्गतया आदौ लिखितपरीक्षा तदनन्तरञ्च मौखिकपरीक्षा भविष्यति। अभ्यर्थिनां संख्यामनुसृत्य मौखिकपरीक्षा सायं यावत् भवितुमर्हति। **अभ्यर्थिभिः प्रातः ९:०० वादने साक्षात्कारस्थले उपस्थातव्यम्।**

**योग्यता** – शास्त्री/बी.ए./आचार्यः/एम.ए./तत्समकक्षयोग्यताधारिणः। **संस्कृतसम्भाषणसामर्थ्यं तु सर्वेषां कृते अनिवार्यम्। वाञ्छा–** पूर्वं सम्भाषणवर्गेषु भागग्रहणं/सम्भाषणशिबिरचालनम्।

**स्थानम्** – अधोनिर्दिष्टेषु स्थानेषु समकालम् एव साक्षात्कारः भविष्यति। अभ्यर्थी स्वसौकर्यानुसारं कस्मिंश्चित् स्थाने उपस्थातुम् अर्हति– (1) राष्ट्रियसंस्कृतसंस्थानम्, (मानितविश्वविद्यालयः) गुरुवायूरुपरिसरः, डाकखाना-पुरनाट्टुकरा, त्रिचूर, **( केरलम् )** (2) राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः) राजीवगान्धीपरिसरः, शृङ्गेरी, चिकमङ्गलूरु **( कर्णाटकम् )** (3) पूर्णप्रज्ञविद्यापीठम्, कत्रिगुप्पा मेन रोड, बेङ्गलूरु **( कर्णाटकम् )** (4) राष्ट्रियसंस्कृतसंस्थानम्, (मानितविश्वविद्यालयः) भोपालपरिसरः, ई-7/62, अरेरा कॉलोनी, नजदीक सैन बोर्ड, भोपालम् **( मध्यप्रदेशः )** (5) राष्ट्रियसंस्कृतसंस्थानम्, (मानितविश्वविद्यालयः) के.जे.सोमैया-परिसरः, द्वितीयतलः, एस्.आई.एम्.एस्.आर्. भवनम्, विद्याविहारः, मुम्बई **( महाराष्ट्रम् )** (6) राष्ट्रियसंस्कृतसंस्थानम्, (मानितविश्वविद्यालयः) जयपुरपरिसरः, त्रिवेणीनगरम्, गोपलपुरा बाईपास, जयपुरम् **( राजस्थानम् )** (7) राष्ट्रियसंस्कृतसंस्थानम्, (मानितविश्वविद्यालयः) गरलीपरिसरः, ग्राम-गरली, ब्लॉक-परागपुर, तहसील-देहरा, जिला-काङ्गड़ा **( हिमाचलप्रदेशः )** (8) राष्ट्रियसंस्कृतसंस्थानम्, (मानितविश्वविद्यालयः) रणवीरपरिसरः, 304-ए, शास्त्री-नगरम्, जम्मू **( जम्मू-कश्मीरम् )** (9) राष्ट्रियसंस्कृतसंस्थानम्, (मानितविश्वविद्यालयः) विशालखण्डः-4, गोमतीनगरम्, लखनऊ **( उत्तरप्रदेशः )** (10) राष्ट्रियसंस्कृतसंस्थानम्, (मानितविश्वविद्यालयः) गङ्गानाथझापरिसरः, चन्द्रशेखर-आजादपार्क, इलाहाबाद **( उत्तरप्रदेशः )** (11) ऋषिकुल-विद्यापीठम्, ब्रह्मचर्याश्रम-संस्कृतमहाविद्यालयः, हरिद्वारम् **( उत्तराखण्डम् )** (12) श्रीबाबाहरदित्तगिरि-संस्कृतमहाविद्यालयः, सरहिन्दनगरम् **( पञ्जाबः )** (13) स्नातकोत्तरसंस्कृतविभागः, ललितनारायणमिथिलाविश्वविद्यालयः, नरगौनापैलेस, दरभङ्गा **( बिहारम् )** (14) अन्नदाविद्यामन्दिरम् आद्यापीठ-दक्षिणेश्वर-रामकृष्ण-सङ्घः, कोलकाता **( पश्चिमबङ्गः )** (15) राष्ट्रियसंस्कृतसंस्थानम्, (मानितविश्वविद्यालयः) सदाशिवपरिसरः, पुरी **( उड़ीसा )** (16) कृष्णकान्तसन्दीकईसंस्कृत-महाविद्यालयः, जालुकबाडी, गुवाहाटी **( असम )** (17) दर्शनम्-संस्कृतमहाविद्यालयः, छारोडी, अहमदाबाद **( गुजरात )** (18) संस्कृतपरिषत्, उस्मानिया-विश्वविद्यालयः, हैदराबाद् **( आन्ध्रप्रदेशः )** (19) राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः) 56-57, इन्स्टीट्यूशनल एरिया, डी-ब्लाक, जनकपुरी, **नवदेहली।**

**आवेदनप्रकारः** – अभ्यर्थिनः उपरिनिर्दिष्टस्थानेषु कुत्रचिदपि परिचयपत्रेण (Photo ID) सह साक्षात् उपस्थातुं शक्नुवन्ति। एतदर्थं पृथक्तया आवेदनपत्रं प्रेषणीयं **नास्ति**, दूरवाण्या सूचनीयमपि **नास्ति**। साक्षात्कारस्थाने एव एकं भावचित्रं (Photo), उत्तीर्णपरीक्षायाः अङ्कपत्रञ्च आवेदनपत्रेण सह संयोज्य समर्पणीयम्।

**विशेषसूचना** – साक्षात्कारार्थं गमनागमनव्ययः भोजनादिसर्वविधव्ययः च अभ्यर्थिभिः स्वयं निर्वोढव्यः। साक्षात्कारे चितेभ्यः प्रशिक्षणविषयकसूचना (प्रशिक्षणं कुत्र, कदा इत्यादिविवरणम्) पश्चात् प्रेषयिष्यते।

**कुलसचिवः, राष्ट्रियसंस्कृतसंस्थानम्**